| | | |
|---|---|---|
| (1) Capital, stock, | **नीवी** परिपणे[1]ऽप्युक्ता[a] कटिदेशे[1]ऽपि **मेखला** । | (1) Loins. |
| (1) Privation. (2) Separation. | प्रत्यवाये[1]ऽपि विश्लेषे[2] **विधुरं** स्मर्यते बुधैः ॥८२४॥ | |
| (1) End. | **निदान**मवसाने[1]ऽपि स्वामिन्यपि[1] भवे**दिनः** । | (1) A master, a lord. |
| (1) Bard. (2) Old, ripe. | **जठरः** कठिने[1]ऽप्युक्तः प्राज्ञैः परिणते[2]ऽपि च ॥८२५॥ | |
| (1) Time. (2) Ordinance. | काले[1] कल्पे[2]ऽपि **विधिर्घनाघनः**[b] शक्र[1]वर्षु[c]काम्बुदयोः[2] । | (1) Indra. (2) Rainy cloud. |
| (1) Distress. (2) Transgression. | **अत्यय**शब्दः प्राज्ञैः कृच्छ्रे[1] चातिक्रमे[2] च निर्दिष्टः ॥८२६॥ | |
| (1) The belly. (2) Water. | उदरे[1] जले[2] **कुपीटं** **सम्बाधः** सङ्कटे[1] भगे[2]ऽप्युक्तः । | (1) Narrow. (2) Vulva, |
| (1) The rear of an army (2) The rear of a battle. | **पार्ष्णिः** प्रत्यासारे[1] च रणस्य च पश्चिमे[2] भागे ॥८२७॥ | |
| (1) Sexual intercourse. (2) Enjoyment. | रति[1]भुक्तयोः[2] **सम्भोगः** पथिदेये[1] स्त्रीधने[2] च **शुल्कं** स्यात् । | (1) Toll, custom, duty. (2) The property of the wife, |
| (1) The shoot of a bamboo. (2) A shrub. | वंशाङ्कुरे[1] **करीरं** वृक्षविशेषे[2]ऽपि कथयन्ति ॥८२८॥ | |
| (1) Race, family. (2) Disposition. | अनूक[1]मन्वये शीले[2] **गोत्रं** नाम्नि[1] तथान्वये[2] । | (1) Name. (2) Race, family. |
| (1) A lump of boiled rice. | **पुलाकं** भक्तसिक्थे[1] च क्षुद्रधान्ये[2] च कथ्यते ॥८२९॥ | (2) Shrivelled grain. |
| (1) An improper act. (2) A privy part. | अकार्ये[1] गुह्ये[2] **कौपीनं** **कीलालं** रुधिरे[1] जले[2] । | (1) Blood. (2) Water. |
| (1) A hole filled with stake. (2) Conflagration of husk. | **कुकूलं** शङ्कुमद्गर्ते[1] तुषाग्नौ[2] च निगद्यते ॥८३०॥ | |
| (1) A building containing an image of Buddha. | **चैत्यं**[d] बुद्धाण्डके[1]ऽप्युक्तं देवतायतने[2] तथा । | (2) A temple. |
| (1) Mushroom. (2) A sort of tree. | छत्रके[1] वृक्षजातौ[2] च **शिलीन्ध्रं**[e] स्मर्यते बुधैः ॥८३१॥ | |
| (1) Prodigal. (2) A beast of prey. | अर्थव्ययसहे[1] **व्यालस्**तथा हिंस्र[f]पशौ[2] स्मृतः । | |
| (1) A ploughshare (2) The snout of a hog. | **पोत्र**मित्युच्यते प्राज्ञैर्हल[1]शूकरयोर्[2]मुखम् ॥८३२॥ | |
| (1) Slow. (2) Free. | मन्द[1]स्वच्छन्दयोः[2] **स्वैरं** **कक्षः** स्यात्कच्छ[1]वीरुधोः[2] । | (1) The hem of an ornament or garment. (2) The creeper. |
| (1) The male elephant. (2) The female elephant. | **करेणु**र्गज[1]हस्तिन्योः[2] **पीलुश्च** गज[1]वृक्षयोः[2] ॥८३३॥ | (1) The elephant. (2) A kind of tree. |

a प्युक्तः, युक्तः b विधिर्घमार्घनः, विधिनाद्यनः, विविधिनाद्यनः, विधिनाघनः c शक्रवर्ष d बुद्धांडके, बुद्धाडके, बुधांडक e शलन्ध्रं, शिलिंध्र, शिलन्ध्रं, f हिंस्रः ।